This Question Paper consists 35 questions and 4 printed pages.
अस्मिन् प्रश्नपत्रे 35 प्रश्नाः एवम् 4 मुद्रित पृष्ठाः सन्ति ।

Roll No. | | | | | | | | | | | | Code No. 60/S/A
अनुक्रमाङ्कः गूढसंख्या

Set A
स्तबकः

# VEDA ADHYAYAN
# वेदाध्ययनम्
# (245)

Day and Date of Examination
(परीक्षादिवसः दिनाङ्कश्च) ____________________

Signature of two Invigilators 1. ____________________
(निरीक्षकयोः हस्ताक्षरम्)
2. ____________________

**सामान्या निर्देशाः :**

1 अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः ।

2 निरीक्ष्यतां यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा । प्रश्नक्रमः सम्यग् न वा ।

3 वस्तुनिष्ठप्रश्ननाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम् ।

4 समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि ।

5 उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति ।

6 स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूनं लेख्या ।

7 समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि ।

# VEDA ADHYAYAN

# वेदाध्ययनम्

# (245)

परीक्षासमयावधिः **(Time)** होरात्रयम् **(3 Hrs)**] [पूर्णाङ्काः **(Full Marks)** : **100**

**निर्देशाः :**

**(1)** अस्मिन् प्रश्नपत्रे **[A]** भागे **10**, **[B]** भागे **10**, **[C]** भागे **10** **[D]** भागे **5** इति आहत्य **35** प्रश्नाः सन्ति ।

**(2)** प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति ।

**(3)** **सर्वे** प्रश्नाः **अनिवार्याः** ।

---

**[A]** दशानां युक्तं विकल्पं चिनुत । **1×10=10**

(1) मन्त्राणां समूह :

(क) संहिता (ख) ब्राह्मणम्

(ग) आरण्यकम् (घ) उपनिषत्

(2) ऋग्वेदस्य भाष्यं सर्वप्रथमं कः विरचितवान् ?

(क) सायणाचार्यः (ख) स्कन्दस्वामी

(ग) रङ्गरामानुजः (घ) हलायुधः

(3) का पृथिवीस्थानीया देवता ?

(क) वरुणः (ख) इन्द्रः

(ग) सूर्यः (घ) अग्निः

(4) दर्शशब्दस्यार्थः –

(क) पूर्णिमा (ख) सूर्यग्रहणम्

(ग) अमावस्या (घ) चन्द्रग्रहणम्

(5) संसमिद्युवसे वृषन्नग्ने – इत्यत्र वृषन्–पदस्य कः अर्थः ?

(क) वृष्टेः दाता (ख) वृषभः

(ग) कामानां वर्षकः (घ) वरणेच्छुः

(6) रुरुचे रण्वसंदृक् – अत्र रण्वसंदृक्–इति पदस्य कः अर्थः ?

(क) रणसंद्रष्ट्री (ख) रणकुशला

(ग) रमणीयदर्शना (घ) रमणीदृक्

(7) वरुणशापात् हरिश्चन्द्रस्य कः रोगः सञ्जातः ?

(क) आन्त्रिकः (ख) मधुमेहः

(ग) ज्वरः (घ) महोदरः

(8) विश्वामित्रनदीसंवादे कयोः नद्योः कथा वर्तते ?

(क) गङ्गायमुनयोः (ख) गोदवरीशुतुन्द्योः

(ग) विपाशातुन्द्योः (घ) नर्मदा–कावोर्योः

(9) पूरुषः इति रूपसिद्धिः केन सूत्रेण भवति ?

(क) छन्दसि बहुलम् (ख) अन्येभ्योऽपि दृश्यते

(ग) अन्येषामपि दृश्यते (घ) शेश्छन्दसि बहुलम्

(10) देवासः – इत्यस्य लौकिकं रूपं किम् ?

(क) देवाः (ख) देवः

(ग) देवैः (घ) देवाय

**[B]** दशानां यथानिर्देशम् उत्तराणि लघूनि लिखत । **2×10=20**

(1) जैमिनिप्रोक्तं ब्राह्मणलक्षणं किम्? के विषया ब्राह्मणे प्रतिपाद्यन्ते? 1+1

(2) आनन्दतीर्थः कस्य वेदस्य भाष्यं कृतवान्? आनन्दतीर्थस्य अपरं नाम किम्? 1+1

(3) इदानीं लभ्यमानः निरुक्तग्रन्थः केन विरचितः? निघण्टुशब्दस्य कः अर्थः? 1+1

(4) सर्वविधसोमयागस्य प्रकृतिः कः? का नाम प्रायणीयेष्टिः? 1+1

(5) युष्माभिरधीतस्य वरुणसूक्तस्य कः ऋषिः, किं छन्दः, का च देवता? 1+1

(6) छन्दसि पुनर्वस्वोरेकवचनम् – इति किंविधं सूत्रम्? अनेन किं विधीयते । 1+1

(7) निष्टर्क्य इत्यस्य लौकिकं रूपं किम्? प्रस्तुतरूपविधायकं सूत्रं च किम्? 1+1

(8) मधुशब्दात् ञप्रत्यये सति किं रूपं भवति? किं च ञप्रत्ययविधायकं सूत्रम्? 1+1

(9) आतोऽटि नित्यम् इति सूत्रेण किं विधीयते? उदाहरणमेकं लिखत । 1+1

(10) गत्वाय इत्यस्य लौकिकं रूपं किम्? अत्र त्तवाप्रत्ययस्य कः आगमो भवति? 1+1

**[C]** दश अनतिदीर्घोत्तरैः समाधत्त । **4×10=40**

(1) किं तावत् वेदलक्षणम्? ऋग्यजुस्साम्नां लक्षणं लिखत ।

(2) ब्राह्मणस्य वेदभागस्य विषये टीकां लिखत ।

(3) को नाम विनियोगः? विनियोगः कतिविधः, के च ते? सोदाहरणं लिखत । **1+1+2**

(4) संगच्छध्वमिति मन्त्रं सम्पूर्णं लिखित्वा तस्यार्थं लिखत ।

(5) यमो नो गातुं प्रथमो विवेद नैषा गव्यूतिरपभर्तवा उ।
यत्रा नः पूर्वे पितरः परेयुरेना जज्ञानाः पथ्या अनु स्वाः ॥ – इति मन्त्रं व्याख्यात ।

(6) अन्नं ह प्राण शरणं ह वासो रूपं हिरण्यं पशवो विवाहाः ।
सखा ह जाया कृपणं दुहिता ज्योतिर्ह पुत्रः व्योमन् ॥ – प्रसङ्गमुल्लिख्य मन्त्रस्यास्य तात्पर्यं लिखत ।

(7) स उत्तमस्य इति सूत्रं व्याख्यात ।

(8) पितरामातरा च छन्दसि इति सूत्रं व्याख्यात ।

(9) देवासः इति रूपं साधयत ।

(10) व्यत्ययो बहुलम् इति सूत्रं व्याख्यात ।

**[D]** पञ्च दीर्घोत्तरैः समाधेयाः । **6×5=30**

(1) सायणभाष्यस्य महत्त्वमालोचयत ।

(2) उषस्–सूक्तस्य सारं प्रतिपादयत ।

(3) शुनःशेपोपाख्यानपठनेन कीदृशी नीतिशिक्षा लभ्यते इति सविस्तरमालोचयत ।

(4) वरुणस्वरूपं यमस्वरूपं वा वर्णयत।

(5) व्यवहिताश्च इति सूत्रं सोदाहरणं व्याख्यात ।